॥ अथ विवाहपद्धति प्रारंभः ॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्रीगणेशायनमः ॥ सुमुखश्चैकदंतश्च कपिलोगजकर्णकः ॥ लंबोदरश्चविक टोविघ्ननाशोविनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्षो भालचंद्रोगजाननः ॥ द्वाद-शैतानिनामानियः पठे च्छृणुयादपि ॥ २ ॥ विद्यारंभे विवाहेच प्रवेशेगमनेत था ॥ संग्रामेसंकटेचैवविघ्नस्तस्यनजायते ॥ ३ ॥ स्वस्ति श्रीमहागणाधिपत येनमः ॥ हरिः ओं ओंगणानांत्वागणपति ठं. हवामहेप्रियाणांत्वाप्रियपतिठं. ह वामहेनिधीनांत्वानिधिपति ठं. हवामहेवसोमम ॥ आहमजानिगर्भधमात्वमजा सिगर्भधम् ॥ १ ॥ सुमुहूर्तमस्तुतथास्तु ॥ ओंविश्वानिदेवसवितुर्दुरितानिपरा सुव ॥ यद्भद्रंतन्नआसुव ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ द्यौः शांतिरंतरि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वि. १

प. १

चर्ठ शांन्तिः पृथवीशांतिरापः शांतिरोषधयः शांतिःवनस्पतयः शांतिर्विश्वेदे-
वाः शांतिर्ब्रह्मशांतिः सर्व्वर्ठ. शांतिःशांतिरेवशांतिः सामाशांतिरेधि द्विपदेभ्यः
शंचतुष्पदेभ्य. शुभशांतिर्भवतु ॥ १ ॥ अथातःसंप्रक्ष्यामिगणयागंसुखावहं ॥
कामकेवासकेयज्ञेविवाहेव्रतसंयमे ॥ १ ॥ आदौगणेश्वरंपूज्यसर्वकामफलप्रदं ॥
मासमासाधिपंदेवंगाणपत्यंलभेन्नरः ॥ २ ॥ येनासौपूजितोदेवः मासाचार्यः प्र
पूजितः ॥ कोसौमासपतिर्देवोह्यत्रधूपेनधूपितः ॥ ३ ॥ ज्येष्ठमासेकृतंपूज्यंयज्ञ-
कालेसनातनः ॥ मंडलंप्रथमंपूज्यंकोष्ठद्वादशमुत्तमं ॥ ४ ॥ सिंदूरेणार्चितोदेवई
शानेतुविनायकः ॥ ग्रहयुक्तंततः स्थाप्यंमासेमासेधिकंफलं ॥ ५ ॥ गणाधिपं
मार्गशीर्षेपौषेवैनायकंतथा ॥ गजवक्रंचमाघेचभालचंद्रंचफाल्गुने ॥ ६ ॥ चैत्र

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मासेतुवेदांगंवैशाखेशिवसूनुकं ॥ ज्येष्ठेशिवसुतंपूज्यं आषाढेहरनंदनं ॥ ७ ॥
श्राबणेतापसंदेवंभाद्रेचमोदकप्रियं ॥ आश्विनेचमहावीर्यंमहावीर्यंचकार्तिके ॥८॥
बिघ्नहताधिकेमासेएवंपूज्यंगणेश्वरं ॥ गंधपुष्पैस्तथाधूपैः कर्पूरैर्यक्षकर्दमैः ॥ ९ ॥
मृगमदैःकुंकुमैश्चापीसिंदूरेणविशेषतः ॥ रक्तोत्पलदलैःपूज्यंबिल्वपत्रेणकेसरैः
१०॥ मालतीकेतकीपुष्पैर्हेमपुष्पैर्विचक्षणः ॥ अर्घंधूपंचदीपंचरक्तवस्त्रेणछादनं ॥
११ एवंयः कुरुतेपूजां दद्यान्मोदकभोजनं ॥ नमोदेवगणेशायनमस्तेविघ्ननाशिने
॥१२॥ नमस्तेमूषकारूढशुभकारायवैनमः ॥ नमःकात्यायनीपुत्रलंबकर्णायवैन
मः ॥ १३ ॥ गजदंतविरूपात्मन्विद्याबुद्धिविचक्षण ॥ देहिमेपुत्रसौभाग्यंदेहि
मेसुखसंपदम् ॥ १४ ॥ आदौपूजागणेशस्यशांतिश्चैवबिशेषतः ॥ १५ ॥ ना

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वि. २

शयेत्सर्वदुष्टानिकल्याणंचभवेत्सदा ॥ कृष्णेनभाषितंपूर्वं देवतापरिकीर्तिता १७
मंडलंयत्रयज्ञेचभुक्तस्तत्रविनायकः ॥ आयुःकर्ताशांतिकर्तावरदोभवपूजितः १८
इतिगणयागसंपूर्णः ॥ श्रीमहागणाधिपतयेनमः जलस्नानंकारयामि ॥ गंधंसमर्प
यामि ॥ अक्षतान्समर्पयामि ॥ पुष्पाणिसमर्पयामि ॥ धूपमाघ्रापयामि ॥ दीपंदर्श
यामि ॥ नैवेद्यंसमर्पयामि ॥ नैवेद्यांते आचमनं ताम्बूलपूगीफलञ्च ॥ हिरण्यगर्भ
इतिदक्षिणांसमर्पयामि ॥ अथकलशप्रतिष्ठा॥ ततईशानकोणेअव्रणंकलशं अक्षत
विभूषितंस्थाप्यभूमिस्पर्शनमंत्रः भूरसिभूमिरस्यदितिरसि बिश्वधायाबिश्वस्यभुव
नस्यधर्त्रीपृथिवींयच्छपृथिवींदृंहं. हपृथिवींमाहिंहं. सीः ॥ धान्यमसीतिधान्यं ॥
धान्यमसिधिनुहिदेवान्प्राणायत्वोदानाय त्वाव्यानायत्वादीर्घामनुप्रसितिमायुषे

प. २

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

धां देबोवः सबिताहिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेणपाणिनाचक्षुषेत्वामहीनां
पयोसितस्योपरिकलशंस्थापयेत् आजिघ्रकशम्मह्यात्वाबिशन्त्विन्दवः पुनरूर्जा
निबर्तस्वसानः सहस्रन्धुक्त्वोरुधारापयस्वतीपुनर्माबिशताद्रयिः वरुणस्योतम्भ
नमितिमन्त्रेण जलेनपूयेत् ॥ ७ ॥ अश्वत्थेवोनिषदनंपर्णेवोवसनिष्कृतागोभा
जइत्किलासथयत्सनवथपूरुषम् याऽओषधीःपूर्वायातादेवेभ्यस्त्रियुगंपुरामनैनुवभ्रू
णामहर्ठ. शनन्धामानिसप्तचइतिसर्वोषधीप्रक्षेपः स्योनापृथिवीनोभवान्नृक्षरानि
वेशनियच्छानः शर्मसप्रथाः ॥ २ ॥ परिबाजपतिःकबिरग्निर्हव्यान्यक्रमीत् दधद्र
त्नानिदाशुषे पंचरत्नानि याःफलीनीर्य्याऽअफला अपुष्पायाश्चपुष्पिणीःबृहस्पतिप्र
सूतास्तानो मुचंत्वर्ठहसः हिरण्यगर्भः समबर्तताग्रेभूतस्यजातः पतिरेकआशी

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वि. ३

तूसदाधारपृथिबीन्द्यामुतेमांकस्मैदेवायहबिषाबिधेम। तत्वायामीतिवरुणमाबाह्य
पूजयेत् ततस्नानं॥ गन्धद्वारांदुराधर्षांनित्ययुष्टांकरीषिणीं॥ ईश्वरींसर्बभूतानांता
मिहोयव्हयेश्रियं॥ इतिगन्धं॥ ओंअन्नन्नमीमदंतह्यबप्रियाअधूषत॥ अस्तोष
तस्वभानवोबिप्रानबिष्ठयामतीयोजान्विन्द्रतेहरी॥ इत्यक्षतान्॥ श्रीश्चतेलक्ष्मी
श्चेति पुष्पं। धरसिधूर्वधूर्बतंधूर्बतंयोस्मान्धूर्बतितंधूर्वयंवयंधूर्बामः॥ देबनाम
सिवन्हितम ठं.सस्नितमंपप्रितमंजुष्टतमंदेवबहूतमम्। इतिधूपं। अग्निर्ज्योति
र्ज्योतिरग्निः स्वाहासूर्योज्योतिर्ज्योतिःसूर्यःस्वाहाअग्निर्बर्चोज्योतिर्बर्चःस्वाहासू
र्योबर्चो ज्योतिर्बर्चःस्वाहाज्योतिः सूर्यःसूर्योज्योतिःस्वाहा। इतिदीपं॥ ॐना-
भ्याआसीदन्तरिक्षठं. शीर्ष्णोद्यौः समवर्तत॥ पभ्द्यां भूमिर्दिशः श्रोत्रात्तथालो

प. ३

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

कांऽअकल्पयन् ॥ इतिनैवेद्यं ॥ शीतलंनिर्मलंतोयंकर्पूरेणसुबासितं ॥ आचम्य
तांसुरश्रेष्ठमयादत्तंचभक्तितः । इत्याचमनं ताम्बूलपूगीफलंच । हिरण्यगर्भःस
मवर्तताग्रेभूतस्यजातः पतिरेकआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवाय
बिषाबिधेम ॥ इतिदक्षिणां ॥ अथकलशप्रार्थना ॥ कलशस्यमुखेबिष्णुःकंठेरुद्रः
समाश्रितः ॥ मूलेतस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः ॥ १ ॥ कुक्षौतुसागराः
सप्तसप्तद्वीपाबसुंधरा ॥ ऋग्वेदोथयजुर्बेदःसामबेदोप्यथर्वणः ॥ २ ॥ अंगैश्चस
हिताः सर्बेकलशंतुसमाश्रिताः ॥ देवदानवसंबादेमथ्यमानेमहोदधौ ॥ ३ ॥ उत्प
न्नोसियदाकुंभबिधृतोबिष्णुनास्वयं ॥ त्वतोयेसर्बतीर्थानिदेवाःसर्बेत्वयिस्थिताः ॥
४ ॥ त्वयितिष्ठंतिभूतानित्वयिप्राणाः प्रतिष्ठिताः ॥ शिवःस्वयंत्वमेबासिबिश्नुस्त्वं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

चप्रजापतिः ॥ ५ ॥ आदित्याबसबोरुद्राबिश्वेदेवाःसपैतृकाः ॥ सर्बेपित्वयितिष्ठं
तियतः कामफलप्रदाः ॥ ६ ॥ त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव ॥ सान्निध्यं
कुरुमेदेवप्रसन्नोभबसर्बदा ॥ ७ ॥ इतिकलशपूजनंसंपूर्णम् ॥ ओंगणानांत्वाग
णपतिर्ठं. हवामहेप्रियाणांत्वाप्रियपतिर्ठंहवामहेनिधीनांत्वानिधिपतिर्ठं. हवामहेब
सोमम ॥ आहमजानिगर्भधमात्वमजासिगर्भधम् ॥ १ ॥ श्रीगणेशइहागच्छइ
हतिष्ठ ॥ ओंब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचोवेनआवः ॥ सबुध्न्याऽउ
पमाअस्यबिष्ठाःसतश्चयोनिमसतश्चबिवः ॥ २ ॥ ब्रह्मन् ॥ ओंबिष्णोरराटम-
सिबिष्णोः श्नप्रेस्थोबिष्णोः स्यूरसिबिष्णोर्ध्रुबोसिवैष्णवमसिबिष्णबेत्वा ॥ ३ ॥
बिष्णबेनमः ॥ नमःशंभवायचमयोभवायचनमःशंकरायचमयस्करायचनमःशि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वायचशिवतरायच ॥ ४ ॥ शिव० ॥ श्रीश्चतेलक्ष्मीश्चपत्न्याबहोरात्रेपार्श्वेन
क्षत्राणिरूपमश्विनौव्यातं ॥ इष्णन्निषाणामुम्मइषाणसर्बलोकम्मइषाण ॥ ५ ॥
लक्ष्मि ॥ पंचनद्यःसरस्बतीमपियंतिसस्रोतसः ॥ सरस्वतीतुपंचधासोदेशेभवत्
सरित् ॥ ६ ॥ सरस्व० ॥ ओंनहिस्पशमबिदन्नन्यमस्साद्वैश्वानरात्पुरएतारम
ग्नेः एमेनमदधंनमृताअमर्त्यंबैश्वानरंक्षैत्रजित्यायदेवाः ॥ ७ ॥ क्षेत्रपाल०॥ओं
आकृष्णेनरजसाबर्तमानोनिबेशयन्नमृतंमर्त्यंच ॥ हिरण्ययेनसबितारथेनादेबो
यातिभुवनानिपश्यन् ॥ ८ ॥ सूय० ॥ ओंइमंदेवाअसपत्नठं. सुबध्वंमहतेक्षत्रा
यमहतेज्यैष्ठयायमहतेजानराज्यायेंद्रस्येंद्रियायइमममुष्यपुत्र ममुष्यैपुत्रमस्यै बि
शएषवोमीराजासोमोस्माकंब्राह्मणानाठं.राजा ॥ चन्द्रमा ॥ ९ ॥ ओंअग्निर्मूर्द्धा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दिवःककुत्पतिः पृथिव्याअयम् ॥ अपाठ.रताठं· सिजिन्वति ॥ १० ॥ भौम ॥
ओं उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टोपूर्तेसठं·सृजेथामयंच ॥ अस्मिन्सधस्थेअ
ध्युतरस्मिन् बिश्वेदेवायजमानश्चसीदत ॥ ११ ॥ बुध ॥ ॐ बृहस्पतेअतिय
दर्योअर्हाद्युमद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणं
देहिचित्रम् ॥ १२ ॥ गुरो० ॥ अन्नात्परिश्रुतोरसंब्रह्मणाव्यपिवत्क्षत्रंपयःसोमं
प्रजापतिः ऋतेनशत्तमिंद्रियंविपानठं·शुक्रमन्धसइन्द्रस्येंद्रियमिदंपयोमृतंमधु ॥
१३ ॥ शुक्र ॥ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंय्योरभिस्रवन्तुनः ॥
१४ ॥ शने० ॥ कयानश्चित्रआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयाबृता ॥
१५ ॥ राहो० ॥ ॐकेतुंकृरावन्नकेतवेपेशोमर्याअपेशसे ॥ समुषद्भिरजायथाः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

॥ १६ ॥ केतो० ॥ ओंत्र्यंबकंयजामहेसुगन्धिंपुष्टिवर्द्धनम् उर्वारुकमिवबन्ध
नान्मृत्योर्मुक्षीयमामृतात् ॥ त्र्यंबक० ॥ जयन्तीमंगलाकालीभद्रकालीकपालि
नी ॥ दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते ॥ १८ ॥ कुलदेवि ॥ अग्निर्दे
वतावातोदेवता सूर्योदेवताचंद्रमादेवतावसवोदेवतारुद्रादेवतादित्यादेवतामरुतो
देवताविश्वैदेवादेवताबृहस्पतिर्देवतेन्द्रोदेवतावरुणोदेवता ॥ १९ ॥ आवोदेवा-
सईमहेवामंप्रयत्पध्वरे ॥ आवोदेवासऽआशिषोयज्ञियासोहवामहे ॥ २० ॥ ब्र
ह्मामुरारिस्त्रिपुरांतकारिर्भानुः शशीभूमिसुतोबुधश्च ॥ गुरुश्चशुक्रःशनिराहुकेत
वःसर्वेग्रहाःशांतिकराभवंतु ॥ २१ ॥ इतिनवग्रहपूजनम् ॥ ओं गणाधिपंनम-
स्कृत्यनमस्कृत्यपितामहं ॥ विष्णुंरुद्रंश्रियंदेवींवंदेभक्त्यासरस्वतीं ॥ १ ॥ स्था

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नाधिपंनमस्कृत्यदिननाथंनिशाकरं ॥ धरणीगर्भसंभूतंशशिपुत्रंबृहस्पतिं ॥ २ ॥
दैत्याचार्यंनमस्कृत्यसूर्यपुत्रंमहाग्रहं ॥ राहुंकेतुंनमस्कृत्ययज्ञारंभेविशेषतः ॥ ३ ॥
शक्राद्यादेवताः सर्वेमुनीश्चकथयाम्यहं ॥ गर्गंमुनिंनमस्कृत्यनारदंमुनिसत्तमं ॥
४ ॥ वसिष्ठंमुनिशार्दूलंविश्वामित्रंतथैवच ॥ व्यासंमुनिंनमस्कृत्यसर्वशास्त्रविशा
रदं ॥ ५ ॥ विद्याधिकायेमुनयः आचार्याश्चतपोधनाः ॥ तान्सर्वान्प्रणमाम्येव
यज्ञरक्षाकरान्सदा ॥ ६ ॥ पूर्वेरक्षतुगोविंदआग्नेयांगरुडध्वजः ॥ याम्यांरक्षतुवा
राहोनारसिंहस्तुनैर्ऋते ॥ ७ ॥ वारुण्यांकेशवोरक्षेद्वायव्यांमधुसूदनः ॥ उत्तरे
श्रीधरोरक्षेदीशानेतुगदाधरः ॥ ८ ॥ ऊर्द्ध्वंगोवर्द्धनोरक्षेदधस्ताच्चत्रिविक्रमः ॥ ए
वंदशदिशोरक्षेद्वासुदेवोजनार्दनः ॥ ९ ॥ शंखोरक्षेच्चयज्ञाग्रेपृष्ठेखड्गस्तथैवच

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

॥ बामपार्श्वेगदारक्षेद्दक्षिणेतुसुदर्शनः ॥ ब्रह्माणंमाधवोरक्षेदाचार्यंपातुमाधवः
॥ अच्युतोवतुऋग्वेदंयजुर्वेदमधोक्षजः ॥ ११ ॥ कृष्णश्चसामगंरक्षेदाथर्विकं
चमाधवः ॥ उपदेष्टातुयोविप्रस्तंरुद्रोवतुसर्वदा ॥ १२ ॥ यजमानंसपत्नीकंकम
लाक्षश्चरक्षतु ॥ रक्षाहीनंतुयत्स्थानंतत्सर्वंरक्षतांहरिः ॥ १३ ॥ वेदमंत्रैश्चकर्त
व्यारक्षाशुभ्रैश्चसर्षपैः ॥ आदौजपेद्गणानांत्वानिरुक्तंजातवेदसं ॥ १४ ॥ यद
त्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा ॥ स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु
॥ १५ ॥ अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं ॥ सर्वेषामबिरोधेनब्रह्मकर्मस
मारभे ॥ १६ ॥ इतिरक्षाविधानंसंपूर्णं ॥ देवताभ्योरक्षासूत्रदानं ततोब्राह्म-
णानांरक्षाबंधनंकर्तव्यं ॥ तत्रमंत्रः ॥ व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम्

CC-0.Courtesy Shri K.S.Parihar,Librarian Government District Library Varanasi. Digitized by eGangotri

वि. ७

दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते ॥ १ ॥ ततस्तिलकमंत्रः ॥ ॐयुंजंति ब्रध्नमरुषंचरंतंपरितस्थुषः रोचंतेरोचनादिवि युंजंत्यस्यकाम्याहरीविपक्षसारथे शोणाधृष्णूनृवाहसा ॥ १ ॥ अथवरंवृणीते ॥ वलबुद्धिर्वैदेवाएतस्यग्रहस्यहो मंपृच्छत्येतस्मादेतंवर्गंसमृद्धिपतिः क्षिप्रेणइमंग्रहंजुहावदन्तितस्माद्वरंवृणीतेमं त्रोयं ॥ ॐयदाबध्नंदाक्षायणाहिरण्य ठं.शतानीकायसुमनस्यमानाः ॥ तन्मआ बध्नामिशतशारदायायुष्मांजरदष्टिर्यथासम् ॥ १ ॥ ॐत्वंयविष्ठदाशुषोनृठ·पाहश्रृ णुधीगिरः ॥ रक्षातोकमुतत्मना ॥ २ ॥ येनराजाबलिर्बद्धोदानवेंद्रोमहाबलः ॥ तेनत्वामनुबध्नामिरक्षेमाचलमाचल ॥ ३ ॥ वाचासुवाचा यन्मयाभाषितंपूर्वक-न्यादानवचस्ततः ॥ इदमर्घमिदंपाद्यमक्षुद्रीकरणायच ॥ १ ॥ पूर्वकेभवेद्वाचा

प. ७

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

सुवाक् ॥ उदरेदशमासैश्चपोषिताचाष्टवर्षीका ॥ तुभ्यंकन्यांप्रदास्यामिदेवाग्निगुरुसंनिधौ ॥ १ ॥ इतिवरवरणं ॥ ॐ अथवरमाहउपानहमुपमुंचतु अग्नौहविर्दैयोघृतकुंभप्रवेशः ॥ तत्रस्थितोवरहोम्यःदूरेधताद्विसंभ्रमःतस्माद्वरमाहउपानहौउपमुंचतात् ॥ अथाग्निंकांश्यपात्रयोर्वेष्टितमादायतुषकेशशर्करारहितायांगोमयेनोपलिप्तायांवेदिकायांस्फेनस्रुवेणवाप्राणग्नप्रादेशमात्रमुल्लिखितायांउल्लेखन क्रमेणानामिकांगुष्ठाभ्यांमृदमुद्धृतायांजलेनाभ्युक्षितायांस्थापयेत् ॥ तत्रसंकल्पंकुर्यात् ॥ ॐतत्सदद्योनमःपरमात्मनेश्रीपुराणपुरषोत्तमायअद्यब्रह्मणोद्वितीय परार्द्धेश्रीश्वेतवाराहकल्पेजंबूद्वीपेभरतखंण्डेरामराज्येकुमारिकानाम्निक्षेत्रे वैवस्वतमन्वंतरेअष्टाविंशतितमेकालेयुगेकलिप्रथमचरणेगंगायमुनयोः पश्चिमेतटेनर्मदा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वि. ८

याःउत्तरेतटे अमुकसंवत्सरेऽमुकऋतौमहामांगल्यप्रदेमासानामुत्तमेऽअमुकमासे
ऽमुकपक्षेऽमुकतिथौवमुकवारेऽ मुकशर्माहंदंपत्योर्बिबाहसांगता सिद्ध्यर्थमग्निपूज
नमहंकरिष्ये ॥ अग्नेशांडिल्यगोत्रअरुणिमाताबरुणपिता अधोमुखःसन्नूर्द्धम
खोभवपाद्यादिदेयं ॥ प्रथमेभुंजतेआपोद्वितीयेक्षितिमेवच ॥ तृतीयेतिलदर्भौ
चचतुर्थेघृतभक्षणं ॥ १ ॥ पंचमेशर्करापानंषष्ठेचकीर्तितोयवः ॥ हुतिंसप्तमेचपूर्णा
सप्तजिव्हाः प्रकीर्तिताः ॥ २ ॥ इत्यग्निकर्मसमाप्तं ॥ ॐषडर्घ्याभवंतिआ
चार्यऋत्विक्बैबाह्योराजाप्रियस्नानकइतिकोयमाचार्यः ॥ वेदांगीब्रह्मचारीचवि
द्वान्बेदबिचक्षणः ॥ प्राज्ञोबुद्धिमतांश्रेष्ठोअयमाचार्यउच्यते ॥ १ ॥ कोसौऋ
त्विक्ज्ञानीवहुगुणश्चैवचतुर्मुखइवप्रभुः ॥ ललितः शीलसंयुक्तऋत्विगेवसउ-

प. ८

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

च्यते ॥ २ ॥ कोसौवैवाह्य ॥ रूपवांश्चगुणीज्ञानीविद्यावांश्चमहाबली ॥ मति
मानतिश्रेष्ठश्चएवंभूतोवरःस्मृतः ॥ ३ ॥ कोराजा ॥ इन्द्रइवप्रजापालोरामोदा
शरथिर्यथा ॥ ईदृशोहिनृपोमान्यस्तस्यार्घंचप्रदीयते ॥ ४ ॥ काप्रिया ॥ राम-
स्यचप्रियासीताविष्णोर्लक्ष्मीस्तथैबच ॥ ईश्वरस्ययथागौरीप्रियाध्र्याकथितेदृशी
॥ ५ ॥ कोसौस्नातकः ॥ सत्यस्नातस्तपःस्नातःस्नातश्चनियमादिषु ॥ विद्यास्ना
तोव्रतस्नातः संपूज्यःस्नातकोव्रती ॥ ६ ॥ अथशाला ॥ ॐअथैठ.शालांप्रपा
दयतिस्वधेन्वैचानडुहस्पनासनीयासर्वविभृतस्तेदेवा आब्रबंधैन्वानडुहयोवापद
ठ.सर्वविभृतोहंजदन्येषांवैसांवीर्य्यतद्धेन्वनडुहयोरदधुस्तस्माद्धे न्वश्चैवापांनड़
वांश्चभूयिष्ठभुक्तस्तध्यैतत्सर्वास्यमिवजोधेन्वानडुहयोराष्णीयांदतगतिरिवतर्ठ.हा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

द्भुतमभियंतोजयायैगर्भंनिरवधीदितिपापमक्रदितिपापीकीर्तिरतस्माद्धेन्वानडु-
हयोरष्णापातर्दहो वापजाज्जोल्क्योस्मामे वाहमर्ठः शालांचेतिभवतीति ॥ ४ ॥
ॐअथैनर्ठः शालांप्रपादयति सजघनेना हवनीछमेत्यग्रेन गार्हपत्यर्ठः सोस्य
संचरोभवत्यापै तद्यस्यैकसंचरो भवत्यासो त्पापाअग्निर्वै जोनिर्जज्ञस्य गर्भ्यो
दीक्षितोत रेणबैजोनिगर्भः संचरतिजति सजत्रैजतित्वत्परिस्तदा बर्ततस्माद्य
स्यैष संचरोभवत्या सोत्पापै ॥ २ ॥ ॐअथैनंशालां प्रपादयतिसप्रपादयति
न्वाचयतिजाधामाहविषायजंतितातेविश्वापरिभूरस्तुयज्ञः गयस्फानःप्रतरणःसो
पचरादर्जामितिग्रहावैऊर्जागृहान्नःशिवःसोतोपापकृतःप्रचीरेत्येवैतदाह ॥ ३ ॥
अत्रहैषकौदकपात्रमुपन्नयंतियथाराज्ञाआमतपोदकमाहरेद्देवंतादितिवदस्तदुतथा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नकुर्जान्मानुषठं.हतेयठं. कुर्यातिविप्रधवैतद्यजस्यमानुषांनेतिविपधंजज्ञस्करवा
नीतितस्मान्नोपन्नयेत् ॥ ४ ॥ आजगामगौतमोयत्रप्रवहनस्यजैवृलेरासनमहा
र्ज्योदकमहारपचकारतस्माहरचकार ॥ ५ ॥ सहोवाचब्रह्मवृतेगौतमपदघ्नये इ
तिसहोवाचप्रतिज्ञायेतेयषचेराजातुकुमारस्यातेवाचमभाषयास्तामेब्रूहीति ॥६॥
सहोवाचदेवेषुगौतमस्तद्वरेषुमानुषानांवहीति ॥ ७ ॥ सहोवाच विज्ञायतेहास्ति
हिरण्यस्यपात्रगोरन्युनांदासीनांप्रवारानांपरिधानानामनोभवांवहारणतस्यर्पयत
स्यभ्यवदान्योभू दितिसवैगौतमतीर्थेनेक्षमाइत्युपैम्यहंभवत मितिवाचमस्मैय
पूर्वनुयांतिसहोपाणिकृत्याउवाच ॥ ८ ॥ अथवरंवृणीते ॥ बलवद्धवैदेवाएतस्यौ
ग्रहास्यहोमंप्रक्ष्यतितस्मादेतवरठं.समद्धपतिक्षिप्रेणइममृत्युंजह दितितस्माद्वरं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वृणीते ॥ ९ ॥ अथवरंवृणीतेयर्ठ.हवेमेकंचषुवाणेवरंवृणीतेसोस्मैसर्वः समृध्यते
तस्माद्वरंवृणीते ॥ १० ॥ अथवाराह्यउपानहौउपमुंचते अग्नौ हवेदेवाघृत कुं
भंप्रवेशयं चक्रुस्ततोवराहः संबभूतस्माद्वराहोगावः संजानतेह्यमेद्यैताभिंसजाते
स्वमेदैस्तत्पशूनामेदोतद्रस्तत्प्रतितिष्ठंतितस्माद्वाराह्यउपानहौउपमुंचते ॥११॥
इतिशालासमाप्ता ॥ इतिप्रतिसंवत्सरमहोरात्रजातिस्मानृऋतौहिऋताविज्यःआ
सनार्हःसाधुर्भवआसनेऽहंसाधुरितिवरउच्यतेकःसाधुः सत्यवान्शीलवान्ज्ञानीस
र्वांग्दृढयस्यबैपरदारिपारत्यागीसोयंसाधुरुप्रच्यतेदशदोषरहितश्चकेदशदोषाः का
णाक्षःपिंगलः अतिदीर्घःअतिह्रस्वःकृष्णःक्षयीरोगीकुष्ठीदरिद्रीअन्यसक्तः एतैर्दश
दोषैरहितःसवरःसाधुर्भवति ॥ अर्चयिष्यामोभवंतमितिब्रुयात्ओं अर्चयेतिवरे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

णोक्तेवरोपवेशनार्थंशुद्धमासनंदत्वाविष्टरमादाय ओं विष्टरोविष्टरोविष्टरइत्यन्ये
नोक्ते ॥ ओंविष्टरःप्रतिगृह्यतामितिदातावदेत् ॥ ओंबिष्टरंप्रतिगृहणामिइत्यभिधा
यवरोविष्टरंगृहीत्वा ॥ ओंवष्मोर्स्मीत्याथर्वणऋषिर्विष्टरोदेवतानुष्टुप्छन्दउपवेश
नेविनियोगः ॥ ओवष्णोर्स्मिसमानानामुद्यतामिवसूर्य्यः ॥ इमंतमभितिष्ठामि
योमाकश्चाभिधासतिइत्यनेनासनेउत्तराग्रविष्टरोपरिवरउपविशति ॥ तत्रउपवि
श्ययजमानः पाद्यमंजलिनादाय ॥ ओंपाद्यंपाद्यंपाद्यमित्यन्येनोक्ते ॥ पाद्यंप्रति
गृह्यतामितिदातावदेत् ओं पाद्यंप्रतिगृह्णामिइत्यभिधाययजमानांजलितोंजलि
नापाद्यमादायवरः ॥ विराजोदोहोसीतिप्रजापतिऋषिरापोदेवतायजुः पादप्रक्षा
लनेजलग्रहणेविनियोगः ॥ ओंविराजोदोहोसिविराजोदोहमशीयमयिपाद्यायैवि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

राजोदोहः ॥ इतिदक्षिणपादंप्रक्षालयति । अनेनैवक्रमेणानेनैवमंत्रेणवामचरण प्रक्षालनं ॥ राजन्यवैश्ययोस्तुप्रथमंवामपादप्रक्षालनंततःपूर्ववद्विष्टरांतरंगृहीत्वा चरणयोरधस्तात् उत्तराग्रंवरःकुर्यात् ॥ ततोदूर्वाक्षतफलपुष्पचंदनयुतार्घपात्रंगृ हीत्वायजमानःओं अर्घोअर्घोअर्घःइत्यन्येनोक्ते ॥ ओंअर्घःप्रतिगृह्यतामितिदा तावदेत् ओं अर्घंप्रतिगृह्णामीत्यभिधाययजमानहस्तादर्घंगृहीत्वा ओं आपस्थ युष्माभिःसर्वान्कामानवाप्नवानीतिशिरस्यक्षतादिकंकिंचिद्दत्वा ॥ ओंसमुद्रंवःप्र- हिणोमिस्वांयोनिमभिगच्छत ॥ अरिष्टाऽस्माकंवीरामापरासेचिमत्पयःइत्यर्घपा त्रस्थंजलमैशान्यांदिशित्यजन्पठति ॥ ततआचमनीयमादायओंआचमनीयमा चमनीयमाचमनीयमित्यन्येनोक्ते ओंआचमनीयंप्रतिगृह्यतामितिदातावदेत्ततो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वरआमनीयंप्रतिगृह्णामीत्यभिधाययजमानहस्तादाचमनीयमादाय ओं आमाग
न्यशसासर्ठ॰सृजवर्चसा ॥ तंमाकुरुप्रियंप्रजानामधिपतिंपशूनामरिष्टतनूनामित्य
नेनसकृदाचामेत् द्विस्तूष्णीं ॥ ततोयजमानःकांस्यपात्रस्थदधिमधुघृतानिकां
स्यपात्रापिहितान्यादाय ओं मधुपर्कोमधुपर्कोमधुपर्कःइत्यन्येनोक्ते ओंमधुपर्कःप्रति
गृह्यतामितिदातावदेत् ओं मधुपर्कंप्रतिगृह्णामिइतिवरोवदेत् ॥ ओं मित्रस्यत्वाचक्षु
षाप्रतीक्षेइतियजमानकरस्थमेवनिरीक्ष्य ओं देवस्यत्वासावितुः प्रसवेश्विनोबा
हुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीत्यनेनमधुपर्कंगृहीत्वावामहस्तेकृत्वा ओं नमः
श्यावास्यायान्नशनयेतआविद्धन्ततोनिष्कृंतामित्यनामिकयात्रिःपदक्षिणामालोड्य
अनामिकांगुष्ठाभ्याभुमौ किंचित्निःक्षिपेत्पुनस्तथैवद्विःप्रत्येकंक्षिपेत् ॥ ततोवरः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ओंयन्मधुनइतिकुत्सऋषिर्मधुपर्कोदेवताजगतीछन्दोमधुपर्कप्राशनेविनियोगः ॥ ओंयन्मधुनोमधव्यंपरमठं. रूपमन्नाद्यंतेनाहंमधुनोमधव्येनपरमेणरूपेणान्नाद्येन नपरमोमधव्योन्नादोशानीत्यनेनवारत्रयंमधुपर्कप्राशनंप्रतिप्राशनेचैतन्मंत्रपाठः ॥ ततोमधुपर्कशेषमसंचरदेशेधारयेत् ॥ ततःद्विराचम्यवरः ओंवाङ्मआस्येस्तु ॥ ओंनसोर्मेप्राणोस्तु ॥ ओंअक्ष्णोर्मेचक्षुरस्तु ॥ ओंकर्णयोर्मेश्रोत्रमस्तु ॥ ओंवा व्होमेबलमस्तु ॥ ओंऊर्वोर्मेओजोस्तु ॥ ओंअरिष्टानिमेंगानितनूस्तन्वामेसहसंतु इत्यास्यादिप्रत्येकंसर्वगात्राणिस्पृष्ट्वा ओंगौर्गौर्गौरित्यन्येनाभिहितेयजमानंच प्रत्युक्तेततोवरः ॥ ओंमातारुद्राणांदुहितावसूनाठं. स्वसादित्यानाममृतस्यना भिः ॥ प्रनुवोचंचिकितुषेजनायमागामनागामदितिंवधिष्ठ ॥ ममचामुष्यचामु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

कशर्म्मणोयजमानस्यउभयोः पापमाहतः ॥ औंउत्सृजततृणान्यत्वितितृणांछि
द्यात् ॥ अथगोसंकल्पः । अद्येत्यादिसंकल्पंकृत्वाअमुकमासेअमुकपक्षे अमुक
तिथौअमुकवासरेअमुकनक्षत्रे॥अस्यमधुपर्कस्यसिध्यर्थंमधुपर्कांगभूतां गांस्वर्ण
शृंगीरौप्यखुरांताम्रपृष्ठांकांस्यदोहनपात्रांइमांगांदातुमहमुत्सृतेज्येनश्रीयज्ञपुरु-
षःप्रीयतां गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश ॥ यस्मातस्माच्छिवंमेस्यादिहलो
केपरत्रच ॥ दोग्ध्रीधेनुरितिमंत्रंपठेत् ॥ अत्रावसरेगृहंप्रविशाति ॥ वरोमातृका
पूजांकुर्यात् ॥ ततोवेदिकायांतुषकेशशर्करादिरहितायांहस्तमात्रपरिमितायांचतु
रस्त्रांयांम्यांकुशैः परिसमुह्यतान्कुशानैशान्यांपरित्यज्यगोमयोदकेनो पलिप्य-
स्फ्येनस्रुवेणवाप्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेणत्रिरुल्लिख्यउल्लेखनक्रमेणानामि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

कांगुष्ठाभ्यामुपांशुमुद्धृत्यजलेनाभ्युक्ष्यतत्रतूष्णींकांस्यपात्रस्थं वींन्हआग्निको-
णादीनायप्रत्यङ्मुखमुपसमाधायतद्रक्षार्थंकिंचिन्नियुज्यकौतुकागाराद्वरः कन्या
मानीयमंडपेउपविश्य ओजरांगच्छपरिधत्स्ववासोभवाकृष्टीनामभिशस्तिपावा
शतंचजीवामिशरदःसुवर्चारयिंचपुत्राननुव्ययस्वायुष्मतीदंपरिधत्स्ववासः इतिप
ठित्वापरिधानबस्त्रंतस्यैददातिवरः ततओंयाअकृंतंनवयंयाअतन्वतायश्चदेवीस्तं
तूनभितोततंथतास्त्वादेवीर्जरसेसंव्ययस्वायुष्मतीदंपरिधत्स्ववासः इतिपठित्वो
त्तरीयन्तस्यैददाति ॥ ततोवरः ओंपरिधास्यैयशोधास्यैदीर्घायुत्वायजरदष्टिरशिम ।
शतंचजीवामिशरदः पुरूचीरायस्योषमभिसंव्ययिष्ये । इतिपठित्वाधोवस्त्रंवरःप
रिधत्ते ॥ ओंयशसामाद्यावापृथिवीयशसेंद्राबृहस्पती ॥ यशोभगश्चमाविदद्य-

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शोमाप्रतिपद्यताम् इतिपठित्वोत्तरीयंपरिदधातिवरः ॥ ततोवरस्यकन्यायाश्च द्विराचमनं ॥ ततःकन्याप्रदेनपरस्परंसमंजेथांइतिप्रैषणंकन्यावरयोः परस्परम भिमुखीकरणं ओंसमंजन्तुविश्वेदेवाः समापोहृदयानिनौ ॥ संमातरिश्वासंधाता समुदेष्ट्रीदधातुनौइतिबरःपठति ॥ ततःकन्याप्रदकर्तृकंग्रंथिबंधनम् कन्याबरयोः ॥ अथहस्तलेपनंमंगलाष्टकं ॥ श्रीमत्पंकजविष्टरोहरिहरौवायुर्महेंद्रोनलोचन्द्रो भास्करवित्तपालवरुणः प्रेताधिपादिग्रहाः ॥ प्रद्युम्नोनलकूवरः सुरगजोचिंताम णिकौस्तुभःस्वामीशक्तिधरश्चलांगलधरः कुर्वंतुनोमंगलं ॥ १ ॥ गंगागोपति गोमतिर्गणपतिर्गोविंदगोबर्द्धनोगीतागोमय गोरजोगिरिसुतागंगाधरोगौतमः ॥ गायत्रीगरुडोगदाधरगयागंभीरगोदावरी गन्धर्वाग्रहगोपगोकुलगणाः कुर्वंतुनो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मंगलम् ॥ २ ॥ इयंप्रशस्तिः ॥ प्रतिश्लोकोत्तरपठनीयेतिसांप्रदायिकाः ॥ स्वस्ति
श्रीमन्नंदनंदनचरणकमलभक्तिरनुराग धर्ममूर्तिधर्मावतारश्रीअग्रकुलकमल-
प्रकाशमहतांमुकुटमणिः सभाशृङ्गारसद्विद्याबिनोदेनकृतकीर्ति विस्तारितअमु
कगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः प्रपौत्रायपौत्रायपुत्राय ॥ नेत्राणांत्रितयंशु
भंपशुपतेरग्नित्रयंपावनंयत्तद्विष्णुपदत्रयंत्रिभुवनेख्यातंचरामत्रयंगं गावाहपथत्र
यं सुविमलंवेदत्रयंत्रीश्वरं संध्यायांत्रितयंद्विजैरभियुतंकुर्वंतुनोमंगलं ॥ १ ॥ गौ
रीश्रीकुलदेवताचसुभगाभूमिप्रपूर्णाशुभासाबित्रीच सरस्वतीचसुरभीसत्यव्रता
रुंधती ॥ स्वाहाजांबवतीचरुक्मभगिनीदुःखघ्नबिध्वंसिनीबेलाचांबुनिधेः समीन
मकराः कुर्बन्तुनोमंगलम् ॥ २ ॥ अश्वत्थोबटवृक्षचन्दनतरुर्मंदारकल्पद्रुमोजं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वृनिंवकदम्बचूतसरलाबृक्षाश्चयेक्षीरिणः ॥ सर्वेतेफलमिश्रितानवदलावैभ्राजतं
राजतेरम्यंचैत्ररथंसनंदनबनंकुर्वंतुनोमंगलम् ॥ १ ॥ बाल्मीकःसनकःसनंदन
मुनिर्व्यासोबशिष्ठोभृगुर्जाबालिर्जमदग्निरामजनकोगर्गोगिरागौतमः ॥ मान्धाता
भरतोनृपश्चसगराधन्योदिलीपोनलः पुण्योधर्मसुतोययातिनहुषः कुर्वन्तुनोमंग
लम् ॥ २ ॥ लक्ष्मीकौस्तुभपारिजातकसुधाधन्वंतरिश्चन्द्रमा ॥ गावः कामदुघाःसि
तः सुरगजोरंभादिदेवागनाः ॥ अश्वःसप्तमुखःसुधाहरिधनुः शंखाभिधश्चांबु-
धेः रत्नानीतिचतुर्दशप्रतिदिनंकुर्वन्तुनोमंगलम् ॥ १ ॥ गंगासिंधुसरस्वतीचय
मुना गोदावरीनर्मदाकाबेरीसरयूमहेंद्रतनया चर्मण्वतीवेदिका ॥ क्षिप्राबेत्रवती
महासुरनदी ख्याताचयागंडकीपूर्णाः पुण्यजलैःसमुद्रसहिताः कुर्वन्तुनोलंगम्

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

म् ॥ २ ॥ दुर्गेदुर्गविनाशिनीभयहरीमाताभयाहारिणीकामाक्षागिरिजाउमाभग
वतीवागीश्वरीयोगिनी ॥ वन्दीसुन्दरिभैरवीसुललितासिद्धेश्वरीरेणुकाबाराहीब
रदायिनीगिरिसुताः कुर्वन्तुनोमंगलम् ॥ ३ ॥ शेषस्तक्षकशंखकालिकुमुदाःप-
द्मस्थिताबासुकी श्रीकर्कोटकपद्मशंखकइतिख्याताचयेपन्नगाः ॥ अन्येकानन
गव्हरेषुजलधौयेप्रातरव्धौस्थितंतेप्रातःस्मरणंसनन्दनवनं कुर्वन्तुनोमंगलम् ॥
४ ॥ ब्रह्माबेदपतिःशिवः पशुपतिःसूर्योग्रहाणांपतिः शक्रोदेवपतिःयमः पितृपति
श्चन्द्रश्चतारापतिः ॥ बिष्णुर्यज्ञपतिर्हविर्हुतपतिः स्कंदश्चसेनापतिः सर्वेतेमुन
यः सुमेरुसहिताः कुर्वन्तुनोमंगलम् ॥ ५ ॥ सिद्धार्थप्रतिकालिदासकबिताकुं
भाः प्रपूर्णाजलैः पुष्पंचन्दनशंखशूकरसटीगोरोचनंश्रीफलं ॥ बिप्राबेदबिदःप्र

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

भातसमयेगोःकांचनव्रीहयोदूर्वामिश्रिततंदुलैः प्रतिदिनंकुर्वन्तुनोमंगलम् ॥ अ
मुनाप्रकारेणप्रपौत्रींपौत्रींपुत्रीम् । ३ । शाखोच्चारणंकन्यादानं ॥ अथकन्यादान दा
ताक्षतपुष्पफलकुशानादायप्रतिज्ञासंकल्पंकुर्यात् । मासपक्षायुल्लिख्य ममसम-
स्तपितृणांनिरतिशयानन्दब्रह्मलोकाबाप्त्यादिकन्यादानकल्पोक्त फलाबाप्तये अ
नेनवरेणास्यांकन्यायामुत्पादयिष्यमाणसन्तत्या दशपूर्वान्दशावरान् पुरुषानुप
वित्रीकर्तुमात्मनश्चश्रीलक्ष्मीनारायण प्रीतयेब्राह्मविवाहविधिनाकन्यादानमहंक
रिष्ये ॥ प्रार्थना ॥ दाताशंखस्थदूर्वा क्षतफलपुष्पचन्दनजलान्यादायजामातृद-
क्षिणकरो परिकन्यादक्षिणकरंनिधाय ॐदाताहंवरुणोराजाद्रव्यमादित्यदैवतं ॥
वरोसौविष्णुरूपेणप्रतिगृह्णात्वयंविधिः इतिपठित्वागोत्रोच्चारणंकुर्यात् ॥ ओंअ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

द्यामुकमासीयामुकपक्षीयामुकतिथौअमुकवासरे अमुकगोत्रस्या मुकप्रवरस्यामु
कशर्म्मणः प्रपौत्राय अमुकगोत्रस्यामुकप्रवत्स्यामुकशर्मणः पौत्राय अमुकगोत्र
स्यामुकप्रबरस्यामुकशर्मणः पुत्रायअमुकप्रवरस्यामुकशर्मणः प्रपौत्रीअमुकगो
त्रस्या मुकप्रबरस्यामुकशर्मणः पौत्रीम् अमुकगोत्रस्यामुकप्रबरस्यामुकशर्मणः
पुत्रींइत्यनेनक्रमेणत्रिरावर्त्यपठनीयं अमुकगोत्रायअमुकप्रवराय अमुकशर्म्मणे
कन्यार्थिनेश्रीधररूपिणे वरायअमुकगोत्रां अमुकप्रवरायअमुकनाम्निइमांकन्यां
वरार्थिनींसालंकारांप्रजापति दैवतांस्वर्गकामः पुराणोक्तशतगुणिकृतज्योतिष्टो
मातिरात्रयज्ञजन्यपुण्यफलप्राप्ति कामश्चपत्नीत्वेनतुभ्यमहंसंप्रददे॥ ओंस्वस्ती
तिप्रतिवचनं ॥ औंद्यौस्त्वाददातुपृथिवीत्वाप्रतिगृह्णातुइतिवरः पठेत् ॥ ओंगौ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रीकन्यामिमांबिप्रयथाशक्तिविभूषिताम् ॥ गोत्रायशर्म्मणेतुभ्यंदत्तविप्रसमाश्र
य ॥ १ ॥ कन्येममाऽग्रतोभूयात्कन्येमेदेबिपार्श्वयोः ॥ कन्येमेपृष्ठतोभूयात्त्व
दानान्मोक्ष्यमाप्नुयात् ॥ २ ॥ ममवंशकुलेजातापालिताबत्सराष्टकम् ॥ तुभ्यं
विप्रमयादत्तापुत्रपौत्रविवर्द्धिनी ततःकन्याप्रदःओंअद्यकृतैतत्कन्यादानप्रतिष्ठा
र्थममुंसुवर्णमग्निदैवतः अमुकगोत्रायअमुकप्रवरायअमुकशर्मणे वरायदक्षिणां
तुभ्यमहंसंप्रददेइतिदक्षिणांदद्यात् ॥ स्वस्तीतिप्रतिबचनं गोमिथुनंवादद्यात् ॥
ओंकोदात्कस्माऽअदात्कामायादात्कामोदाताकामः प्रतिग्रहीताकामैतत्तइतिवरः
पठेत् ॥ ततस्तांपाणौगृहीत्वा ॐयदैषिमनसादूरंदिशोनुपवमानो वाहिरण्यपर्णो
वैकर्णः सत्वामन्मनसांकरो तुश्रीअमुकदेबीइतिपठन्निष्क्रामति ॥ ततोबेदिदक्षि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

णस्यान्दिशिवारिपूर्णकलशं ऊर्द्धंतिष्ठतोमौनिनोदृढपुरुषस्यस्कंधे अभिषेकपर्यंतं धारयेत्ततः परस्परंसमीक्षेथांइतिकन्यापूर्वपैषानंतरं ॐअघोरचक्षुरपतिघ्नेधि शिवापशुभ्यः सुमनाः सुवर्चाः ॥ वीरसूर्देवकामास्योनाशन्नोभवद्विपदेशंचतुष्प दे ॥ सोमः पथमोविविदेगंधर्वोविविदउत्तरस्तृतीयोऽअग्निष्टेपतिस्तुरीयस्ते म नुष्यजाः ॥ सोमोददद्गन्धर्वायगन्धर्वोददग्नये ॥ रयिंचपुत्रांश्चादादग्निर्मह्य मथोइमां ॥ सानः पूषाशिवतमामैरयसानऊरुउशतीविहरयस्यामुशंतः प्रहराम शेपंयस्याभुकामावहवोनिविष्ठ्यै ॥ ४ ॥ इतिवरःपठितिमंत्रांतेपरस्परंनिरीक्षण म् ॥ अथकुशकंडिका ॥ ततोग्निंपूर्वदक्षिणीकृत्य पश्चादग्नेरहतवस्त्रवेष्टिततृण पूलकेकटेवात दुपरिदक्षिणंचरणं दत्वावधूदक्षिणतः कृत्वातामुपवेश्यस्वयमुप-

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

बिश्यवरः पुष्पचंदनतांबूलबस्त्राण्यादायओं अद्यकर्तव्यबिबाह होमकर्मणिकृता
कृतावेक्षणरुपब्रह्मकर्मकर्तु ममुकगोत्रममुकशर्म्माणं ब्राह्मणमेभिः पुष्पचंदनतां
बूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणे इतिब्रह्माणंवृणुयात् ओं बृतोस्मीतिप्रतिवचनं
॥ ततःप्रार्थना यथाचतुर्मुखो ब्रह्मासर्बलोकपितामहतथात्वंममयज्ञेस्मि ब्रह्मा
भवद्विजोत्तम ॥ १ ॥ यथाबिहितंकर्मुकरुइतिबरेणोक्ते ओं करबाणीतिब्राह्मणो
वदेत् ॥ ततोग्नेर्दक्षिणतः शुद्धमासनंदत्वातदुपरिप्रागग्रान् कुशानास्तीर्यब्रह्मा
णमग्निप्रदक्षिणक्रमेणा नीयात्रत्वंमेब्रह्मा भवेत्यभिधायकल्पितासनेउपवेशयेत् ॥
ॐअद्यकर्तव्य विबाहहोम कर्म्मणिकृताकृतावेक्षणरूपब्रह्म कर्मकर्तु ममुकगोत्र
ममुकशर्माणं ब्राह्मणं पुष्पचन्दनतांबूल वासोभिः ब्रह्मत्वेन त्वामहंवृणे ॐवृ-

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तोस्मीति प्रतिवचनं ॥ ततःआचार्यंब्रूयात् ॐआचार्य्यस्तुयथास्वर्गेशक्रादी
नांबृहस्पतिः तथात्वंममयज्ञेस्मिनाचार्योभवसुव्रत पूर्णीतापात्रंपुरतः कृत्वावा
रिणापरिपूर्यकुशैराच्छाद्यब्रह्मणोमुखमवलोक्यअग्नेरुत्तरतः कुशोपरिनिदध्यात् ॥
ततः परिस्तरणंबर्हिषश्चतुर्थभागमादाय आग्नेयादीशानांतंब्रह्मणोग्निपर्यंतंनै
ऋत्याद्वायव्यान्तंअग्नितः पूर्णीतापर्य्यंतंततोग्नेरुत्तरतः पश्चिमदिशिपवित्रछेद
नार्थंकुशत्रयंपवित्रकरणार्थंसाग्रमनंत र्गर्भकुशपत्रद्वयंप्रोक्षणीपात्रं आज्यस्था
लीसंमार्जनार्थं कुशत्रयंउपयमनार्थं बेणीरूपकुशत्रयंसमिधास्तिस्रः स्रुवःआज्यं
षट्पंचाशदुत्तरय जमानमुष्टिशतद्वया वच्छिन्नपूर्ण पात्रंपबित्रछेदन कुशानांपू
र्वपूर्वदिशिक्रमेणा सादनीयं ॥ अथतस्यामेवदिशिअसाधारणबस्तून्युपकल्पनी

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

यानितत्रशमीपाला शमिश्रान्लाजान्दृष दुपलंकुमारी भ्रातासूर्य्यः दृढपुरुषः
अन्यदपितदुपयुक्तमाले पनादिद्रव्यंततः पवित्रछेदनकुशैः पवित्रेच्छित्वाततःस
पवित्रकरेणप्रणीतोदकंत्रिः प्रोक्षणीपात्रे निधायअनामिकांगुष्ठाभ्या मुत्तराग्रेप
वित्रेगृहीत्वा त्रिरुत्पवनंततः प्रोक्षणीपात्रस्यसव्यहस्तकरणं अनामिकांगुष्ठा-
भ्यांपवित्रेगृहीत्वात्रिरुद्दिंगनं प्रणीतोदकेनप्रोक्षणी प्रोक्षणंप्रोक्षणी जलेनयथा
सादितवस्तुसेचनं ततोग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रनिधानं आज्यस्थाल्यामा
ज्यनिर्बापः ततोधिश्रयणं ततोज्वलतृणादि नाहबिर्वेष्टयित्वाप्रदक्षिणक्रमेणव-
न्हौतत्प्रक्षेपः पर्यग्निकरणंततः स्रुवप्रतपनंकृत्वा संमार्जनकुशानामग्रैरंतरतोमू
लैर्वाह्यतः श्रुवसंमार्जनंप्रणीतोदकेना स्रभ्युक्ष्यपुनः प्रतप्यस्रुवंदक्षिणतोनिद

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ध्यात्ततआज्यस्याग्नेरवतारणंतत आज्येप्रोक्षणिवदुत्पवनं अवेक्ष्यसत्यपद्रव्ये
तनान्निरसनपुनःप्रोक्षण्युत्पवनंतत उपयमनकुशानुबामहस्ते नादायउतिष्ठन्प्रजा
पतिंमनसाध्यात्वा तूष्णीमग्नौघृताक्तास्तिस्रः समिधः क्षिपेत् ॥ ततउपविश्यस
पवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निपर्युक्षणंकृत्वाप्रणीतापात्रे पवित्रेनिधा
यपतितदक्षिणजानुः कुशेनब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जु
होतितत्राऽघारादारभ्य द्वादशाहुतिषुततदाहुत्यनंतरं स्रुवावस्थितहुतशेष घृत-
स्यप्रोक्षणीपात्रेप्रक्षेपः ॥ ॐप्रजापतयेस्वाहा इदंप्रजापतये ॥ इतिमनसा ॥
ॐइन्द्रायस्वाहा इदमिंद्रायइत्याघारौ ॥ ओंअग्नयेस्वाहा इदमग्नये ॥ ओंसोमा
यस्वाहा इदंसोमायइत्याज्यभागौ ॥ इदमग्नये । इदंवायवे इदंसूर्यायेतिवात्या

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

गः ॥ ४ ॥ ॐ भूः स्वाहाइदंभूः ॥ ओंभूवः स्वाहाइदंभुवः ॥ ओंस्वःस्वाहाइ
दंस्वः ॥ एतामहाव्याहृतयः ॥ ओंत्वन्नोअग्नइतिवामदेवऋषिरग्निवरुणौदेवतेत्रि
ष्टुप छन्दोहोमेविनियोगः ॥ ओंत्वन्नोअग्नेवरुणस्य बिद्वान्देवस्यहेडो अवयासि
सीष्ठाः ॥ यजिष्ठोवन्हितमः शोशुचानोविश्वाद्वेषा ॐसिप्रसुमुग्ध्यस्मत्स्वाहाइ
दंमग्नीवरुणाभ्यां ॥ ओंसत्वन्नोअग्नेबमोभवोतीने दिष्ठोअस्याउषसोव्युष्टौ ॥
अवयक्ष्वनोवरुणर्ठं. रराणोबीहिमृडीकर्ठं. सुहवोनएधिस्वाहा इदमग्नीवरुणा
भ्यां ॥ अयाश्चाग्नइतिवामदेव ऋषिरग्निर्देवतात्रिष्टुप्छन्दः सर्वप्रायश्चित्तहो
मेबिबियोगः ॥ ओंअयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि ॥ अ
यानोयज्ञंवहास्ययानेधेहिभेषज ॐस्वाहाइदमग्नये ॥ ओंयेतेशतंवरुणये सह

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्वंयज्ञियाः पाशावितातामहांतस्ते भिन्नौअद्यसबितोत बिष्णुर्विश्वेमुंचंतुमरुतः
स्वर्काः स्वाहाइदंवरुणायसबित्रे बिष्णबेबिश्वेभ्यो देबेभ्योमरुद्भ्यःस्वर्केभ्यः ॥
ओंउदुत्तमंबरुणपाश मस्मदवाधमंबिमध्यम ॐश्रथाय ॥ अथावयमादित्यब्रते
तबानागसोअदितयेस्यामस्वाहा इदंबरुणाया दितयेएताः प्रायश्चित्तसंज्ञकाः त
तोऽन्वारब्धंबिना ॥ ओंप्रजापतयेस्वाहा इदंप्रजापतये ॥ ओंअग्नयेस्विष्टकृते
स्वाहा इदंमग्नयेस्विष्टकृते ॥ उदकोपस्पर्शनं ॥ अथराष्ट्रभृत्यः ॥ ओंऋता
षाड्ऋतधामाग्निगंधर्बः सनइदंब्रह्मक्षत्रं पातुतस्मैस्वाहाबाट् ॥ इदमृतासाहेऋ
तधाम्नेऽग्नयेगन्धर्बाय ॥ ओंऋताषाड्ऋत धामाग्निर्गन्धर्बस्तस्यौषधयोप्सर
सोमुदोनामताभ्यःस्वाहा इदमोषधीभ्यो ष्सरोभ्योमुभ्यः ॥ ओंसठ.हितोबिश्व

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

सामासूर्य्योगन्धर्वः सनइदंब्रह्मक्षत्रं पातुतस्मैस्वाहा बाट्इदंसर्ठ. हितायविश्व
साम्नेसूर्यायगन्धर्वाय ॥ ओं सर्ठ.हितोबिश्वसामासूर्य्यो गन्धर्वस्तस्यमरीचयो
प्सरसआयुवोनामसनऽइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्एवंताभ्यःस्वाहा॥ इदंमरी
चिभ्योप्सराभ्यःआयुभ्यः।४। ओंसुषुम्णःसूर्यरश्मिश्चंद्रमागन्धर्वःसनइदंब्रह्मक्षत्रं
पातुतस्मैस्वाहाबाट्इदंसुषुम्णायसूर्यरश्मयेचंद्रमसेगन्धर्वाय। ओंसुषुम्णःसूर्यर
श्मिश्चंद्रमागन्धर्वस्तस्यनक्षत्राण्यप्सरसोभेकुरयोनामताभ्यःस्वाहा ॥ इदंनक्षत्रे
भ्योप्सरोभ्योभेकुरुभ्यः। ओंइषिरोबिश्वव्यचावातोगन्धर्वःसनइदंब्रह्मक्षत्रंपातुत
स्मैस्वाहाबाट्इदमिषिरायबिश्वव्यचसेवातायगन्धर्वाय। ओंइषिरोबिश्वव्यचावा
तोगन्धर्वस्तस्यापोऽअप्सरसउर्जोनामताभ्यःस्वाहाइदंमरुभ्योद्ऽप्सरोभ्यऊर्गभ्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ओंभुज्युः सुपर्णोयज्ञोगन्धर्वः सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा वाट्इदंभुज्यवेसुपर्णाय यज्ञायगन्धर्वाय ओंभुज्युः सुपर्णोयज्ञोगन्धर्वस्तस्यदक्षिणाऽप्सरसस्तावानामताभ्यःस्वाहा ॥ इदंदक्षिणाभ्योऽप्सरोभ्यस्तावाभ्यः ॥ ओंप्रजापतिर्विश्वकर्मामनोगन्धर्व सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा वाट्इदंप्रजापतये विश्वकर्मणेमनसेगन्धर्वाय ॥ ओंप्रजापतिर्विश्वकर्मा मनोगन्धर्वस्तस्यऋक्सामान्यऽप्सरसराएष्टयोनामताभ्यःस्वाहा इदमृक्सामेभ्योऽप्सरोभ्य एष्टिभ्यः १२ उदकस्पर्शनं ॥ ओंआपःशिवाःशिवतमाः शांताः शांततमास्तास्तेकृण्वंतुभेषजंइतिराष्टभृतः ॥ अथजयाहोमः ओंचित्तंचस्वाहा इदंचित्ताय ॥ ओंचितिश्चस्वाहा इदंचित्यै ओंआकूतंचस्वाहा इदमाकूताय ॥ ओंआकूतिश्चस्वाहा इदमाकूत्यै ॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ओंविज्ञातंचस्वाहा इदंविज्ञाताय ॥ ओंविज्ञातिश्चस्वाहा इदंविज्ञात्यै ॥ ओंम
नश्चस्वाहाइदंमनसे ॥ ओंशक्करीश्चस्वाहा इदंशक्करीभ्यः ॥ ओंदर्शश्चस्वाहाइ
दंदर्शाय ॥ ओपौर्णमासंचस्वाहा इदंपौर्णमासाय ॥ ओंबृहच्चस्वाहा इदंबृहते
॥ ओरथंतरंचस्वाहा इदंरथंतराय ॥ ॐप्रजापतिर्जयानिंद्रायवृष्णोप्रायच्छदु
ग्रः पृतनाजयेषु ॥ तस्मैविशः समनमंतः सर्वासउग्रः सइहव्योबभूवस्वाहाइदं
प्रजापतयेजयानिंद्राय ॥ इतिजयाहोमः ॥ उदकोयस्पर्शनं ॥ ओं अग्निर्भूता
नामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायाम-
स्मिन्कर्म्मण्यस्यां देवहूत्या ॐस्वाहाइदमग्नये भूतानामधिपतये ॥ ओंइन्द्रो
ज्येष्ठानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेस्यामा शिष्यस्यांपुरोधा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

यामस्मिन्कर्मण्य स्यांदेवहूत्याॐस्वाहा इदंमिंद्रायज्येष्ठानामधिपतये ॥ ओय
मः पृथिव्याऽधिपतिः समावस्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यांपुरो
धायामस्मिन् कर्म्मण्यस्यांदेवहूत्याॐस्वाहा इदंयमायपृथिव्याधिपतये ॥ अ
त्रप्रणीतोदकस्पर्शः ॥ ओंवायुरंतरिक्षस्याधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्
क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यांदेवहुत्याॐस्वाहा इदंवाय
वेअंतरिक्षस्याधिपतये ॥ ओंसूर्य्योदिवोधिपतिःसमावस्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रे
स्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्याठं. ॐस्वाहाइदंसूर्य्यायदि
वोधिपतये। ओंचन्द्रमानक्षत्राणामधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्या
माशिष्यस्यां पुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्याठं. ॐस्वाहाइदंचंद्रमसेनक्ष

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्राणामधिततये ॥ ओंबृहस्पतिर्ब्रह्मणोधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन्क्ष
त्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यांदेवहूत्यार्ठ. ॐस्वाहाइदंबृहस्प
तये ब्रह्मणोधिपतये । ओंमित्रः सत्यानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मि
न्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यांदेवहूत्यार्ठ. ॐस्वाहाइदं
मित्रायसत्यानामधिपतये ॥ ओंवरुणोपामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मि
न्क्षत्रेस्यामा शिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यष्यांदेवहूत्यार्ठ. स्वाहाइदंवरु
णायापामधिपतये ॥ ओंसमुद्रः स्त्रोत्यानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मि
न् क्षत्रेस्यामाशिष्यस्यां पुरोधायामास्मिन् कर्म्मण्यस्यांदेवहूत्यार्ठ. ओंस्वाहाइदं
समुद्राय स्त्रोत्यानामधिपतये ॥ ओं अन्नर्ठसाम्राज्यानामधिपतिः समावत्वस्मि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वि. २३

न् ब्रह्मण्यस्मिन्क्षत्रेस्यामा शिष्यस्यांपुरोधायमस्मिन् कर्म्मण्यस्यांदेवहूत्यार्ठ. स्वाहा इदमन्नाय साम्राज्यानामधिपतये ॥ ओंसोमऽऔषधीनमधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामा शिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यांदेवहूत्यार्ठ. स्वाहाइदं सोमायौषधी नामधिपतये ॥ ओं सबिताप्रसवानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामा शिष्यस्यांपुरो धायामस्मिन् कर्म्मण्यस्यांदेवहूत्यार्ठ. ओं स्वाहाइदंसबित्रेप्रसवानामधिपतये॥ओंरुद्रःपशूनामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रे स्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदे वहूत्यार्ठ.स्वाहाइदंरुद्रायपशूनामधिपयये॥अत्रप्रणीतोदकस्पर्शः॥ ओंत्वष्टारूपाणामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरो

प. २३

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

धायामस्मिन्कर्म्मण्यस्यां देवहूत्यार्ठं.स्वाहाइदंत्वष्ट्रेरूपाणामधिपतये ॥ ओंवि
ष्णुःपर्वतानामधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामा शिष्यस्यांपुरोधा
यामस्मिन्कर्म्मण्यस्यांदेवहूत्यार्ठं.स्वाहाइदंविष्णवेपर्वतानामधिपतये ॥ ओंमरु
तोगणानामधिपतयस्तेमावं त्वस्मिन्ब्रह्मण्यक्षत्रेस्यामाशिष्वस्यांपुरोधायाम
स्मिन्कर्म्मण्यस्यांदेवहूत्यार्ठं.स्वाहाइंदमरुद्भ्योगणानामधिपतिभ्यः ॥ ओंपित
रःपितामहाःपरेवरेततास्ततामहाइहमावंत्वस्मिन्ब्रह्मण्य स्मिन्क्षत्रेस्यामाशिष्य
स्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्यार्ठं. स्वाहाइदंपितृभ्यपितामहेभ्यः परे
भ्योवरेभ्यस्ततेभ्यस्ततामहेभ्यः ॥ अत्रप्रणीतोदकोपस्पर्शनं ॥ इत्याभ्यातानना
मकं ॥ ओं अग्निरैतु प्रथमोदेवतानार्ठं.सोस्मैप्रजांमुंचतुमृत्युंपाशात् ॥ तदय

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वि. २४

ठं.राजावरुणोनुमन्यतांयथेयठं. स्त्रीपौत्रमघन्नरोदात्स्याहाइदग्नये ॥ ओंइमाम
ग्निस्त्रायतांगर्हपत्यःप्रजामस्यैनयतुदीर्घमायुः ॥ अशून्योपस्थाजीवतामस्तुमा
तापौत्रमानन्दतामभिविबुध्यतामियठं.स्वाहाइदमग्नये ॥ ओंस्वस्तिनोअग्नेदि
वापृथिव्याविश्वानिधेह्ययथायजत्र ॥ यदस्यांमहिदिविजातं प्रशस्तंतदस्मासुद्र
विणंधेहिचित्रठं.स्वाहाइदमग्नये ॥ ओंसुगंनुपंथांप्रदिशन्नएहिज्योतिष्मध्येह्यज
रन्नआयुः। अपैतुमृत्युरमृतंमआगाद्वैवस्वतोनोअभयंकृणोतुस्वहाइदवैवस्वताय
। अत्रप्रणीतोदकस्पर्शनं। ततअंतरपटं। ओंपरंमृत्योरनुपरेहिपन्थांयस्तेअन्यइत
रोदेवयानात्। चक्षुष्मतेशृण्वतेतेब्रवा मिमानःप्रजाठं.रीरिषोमोतवीरान्स्वाहाइदं
मृत्यवे। अत्रप्रणीतोदकोपस्पर्शनं। ततोवधूमग्रतःकृत्वावरोवधूश्चद्वावपिप्राङ्मुखौ

प. २४

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्थितौभवतःततोवरांजलि पुटोपरिसंलग्नवध्वंजलिस्थघृताभिघारितवधूभ्रातृ
दत्तशमीपलाशमिश्रैर्लाजैर्वधूकर्तृकोमंत्रपाठपूर्वकोहोमः ॥ तत्रमंत्राः ॥ अर्य्य
म्णामित्याथर्वणऋषिरग्निर्देवतानुष्टुपूछन्दोलाजाहोमेविनियोगः ॥ ओंअर्य्यम्
णंदेवंकन्याअग्निमयक्षतसनोअर्यमादेवः प्रेतोमुंचंतुमापतेः स्वाहाइदमर्य्यम्णे
देबाय ॥ ओइयंनार्य्युपब्रूतेलाजानावपंतिकाआयुष्मानस्तुमेपतिरेधंतांज्ञातयो
ममस्वाहाइदमग्नये ॥ ओंइमांलाजानावपाम्यग्नौसमृद्धिकरणंतव ॥ ममतुभ्य
चसंवननंतदग्निरनुमन्यतामियर्ठ.स्वाहाइदमग्नये ॥ ततोवरोवधूदक्षिणहस्तंसां
गुष्ठंगृह्णाति ॥ ओंगृभ्णामितेसौभगत्वायहस्तंमयापत्याजरदष्टिर्यथासः ॥ भगो
अर्य्यमासवितापुरंधिर्म्मह्यंत्वादुर्गार्हपत्यायदेवाः ॥ अमोहमस्मिसात्वर्ठ.सात्वम

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्यमोअहंसामाहमस्मिऋक्तंद्यौरहंपृथिवीत्वंतावेहिविवहावहैसहरेतोदधावहै ॥
प्रजांप्रजनयावहैपुत्रान्विंद्यावहैबहून् ॥ तेसन्तुजरदष्टयःसंप्रियौरोचिष्णूसुमन
स्यमानौपश्येमशरदःशतंजीवेमशरदःशतठं. शृणुयामशरदः शतमितिमंत्रेणअ
थैनांवधूंअश्मानमारोहयतिउतरतोऽग्नेर्दक्षिणपादेनअथवधूग्नेरुतरतः प्राङ्मुखी
पूर्वोपकल्पितंवृषदुपलंदक्षिणपदेनारोहयतिवरः ॥ ओंआरोहेमश्मानमश्मेवत्व
ठंस्थिराभव ॥ अभितिष्ठपृतन्यतोववाधस्वपृतनायतःइतिमंत्रेणआरूढायामेव
तस्यांवरोगाथांगायति ॥ ओंसरस्वतिप्रेदमवसुभगेवाजिनीवति ॥ यांत्वांविश्व
स्यभूतस्यप्रजायामस्याग्रतःयस्यांभूतठं. समभवद्यस्यांविश्वमिदंजगत् ॥ ताम
द्यगाथांगास्यामियास्त्रीणामुत्तमंयशः ॥ ततोग्नेवधूपश्चाद्वरःप्रणीताब्रह्मसहितम

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ग्निंप्रदक्षिणंकुरुतःतत्रवरपठनीयोमंत्रः ॥ ओंतुभ्यमग्रेपर्य्यवहन्सूर्यांवहतुनास
ह ॥ पुनःपतिभ्योजायादग्नेप्रजयासह ॥ ततःपश्चादग्नेःस्थित्वालाजाहोमसांगु
ष्ठहस्तग्रहणाश्मारोहणगाथागानाग्निप्रदक्षिणंपुनरपि तथैवएतेननवलाजाहुत
यः सांगुष्ठहस्तग्रहणगाथागानत्रयंप्रदक्षिणत्रयंसं पद्यंतेततोअवशिष्टलाजैः क
न्याभ्रातृदत्तरंजलिस्थसूर्पकोणेनवधूर्जूहोति ॥ ओंभगायस्वाहाइदंभगाय ॥ च
तुर्थभ्रमणंतूष्णींअग्रेवरः पश्चात्वधूःततस्तूष्णींपरिक्रमणमूततोवरः उपविश्य
ब्रह्मणान्वारब्धः आज्येनप्राजापत्यंजुहुयात् ॥ ओंप्रजापतयेस्वाहाइदंप्रजापत
येइतिमनसा ॥ अत्रप्रोक्षणीपात्रहूतशेषाज्यस्यप्रक्षेपः ॥ ततआलेपनेनोत्तरोत्त
रकृतसप्तमंडलेषुसप्तपदाक्रमणंवरः कारयतिवक्ष्यमाणमंत्रैः ॥ तत्रप्रथमे एकमि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

खेविष्णुस्त्वानयतु ॥ द्वितीये । द्वेऊर्जेविष्णुस्त्वानयतु तृतीये । त्रीणिरायस्पो
षायविष्णुस्त्वानयतु ॥ चतुर्थे चत्वारिमायो भवायविष्णुस्त्वानयतु ॥ पंचमे पं
चपशुभ्योविष्णुस्त्वानयतु ॥ षष्ठे षड्ऋतुभ्योविष्णुस्त्वानयतु ॥ सप्तमे सखे
सप्तपदाभवसामामनुव्रताभवविष्णुस्त्वानयतु ॥ ततोग्नेः पश्चादुपविश्यपुरुष
स्यस्कंधेस्थितकुंभादाभ्रपल्लवेनजलमानीयतेनचवरोवधूंएनांमूर्द्धन्य भिषिंचति॥
ॐ आपःशिवाःशिवतमाःशांताः शांतासांतमास्तास्तेकृण्वंतुभेषजमितिपुनस्तथै
वानीतजलेनात्मानमभिषिंचति ॥ ॐ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥
महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥
तस्माअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ इतितिसृभिः ॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

अथैनांसूर्यमुदीक्षस्वेति ॥ ॐ तच्चक्षुरित्यनेनमंत्रेणवधूःसूर्यंपश्यति अस्तमिते सूर्येध्रुवमुदीक्षस्वेतिपतिः प्रैषानंतरंध्रुवंपश्यति ॥ तत्रपठनीयोमन्त्रः ॥ ॐ ध्रुव मसिध्रुवंत्वापश्यामिध्रुवैधिपोष्पेमयिमह्यंत्वादादृबृहस्पतिर्मयापत्याप्रजावतीसंजी वशरदःशतमिति ॥ पृष्टासायदिनपश्यतितथापिपश्यामीतिब्रूयात् ॥ ततोवरो वधूदक्षिणांसोपरिहस्तंनीत्वातस्याहृदयमालभेत् ॥ ममव्रतेतेहृदयंदधामि ॥ म मचित्तमनुचित्तन्तेअस्तु ॥ ममवाचमेकमनाजुषस्व ॥ प्रजापतिस्त्वानियुनक्तुम ह्यमितिमंत्रेणअथैनाममिमंत्रयतिवरः ॥ ॐ सुमंगलीरियंवधूरिमाठ.समेतपश्य त ॥ सौभाग्यमस्यैदत्वायाथास्तांवपेतनइतिमंत्रेणवरस्यवामभागेबधूमुपवेश याति ॥ सिन्दूरदानंकरोतिवध्वासीमन्तेवरः ॥ अथवधूंवलवान्कश्चित्ब्राह्मणउ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्थायप्रागुयग्वानुगुप्तागारेलोहितानडुहचर्म्मणिप्रतिलोमास्तीर्णेउपवेशयेत्व
रोवा ॐ इहगावोनिषीदंत्विहाश्वाइहपुरूषाइहो सहस्रदक्षिणोयज्ञइहपूषानिषी
दंत्वितिमंत्रेण ॥ अथस्विष्टकृद्धोमः ॥ ओंअग्नयेस्विष्टकृते स्वाहाइदमग्नये
स्विष्टकृते ॥ स्रुवावशिष्टाज्यस्यप्रोक्षणीपात्रेप्रक्षेपः ॥ अयंचहोमोब्रह्मणान्वार
ब्धकर्तृकः ॥ ततआचम्यसंस्रवप्राशनं ॥ अथाचम्य ओंअद्यकृतैततविवाहहो
मकर्म्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापति दैवतममुकगोत्रायामुकशर्म्मणेब्राह्मणा
यदक्षिणांतुभ्यमहंसंप्रददे इतिब्रह्मणेदक्षिणांदद्यात्स्वस्तीतिप्रतिवचनं ॥ ओं
अद्यकृतैतद्विवाहहोमकर्म्मणि आचार्य्यकर्म्म प्रतिष्टार्थमुइदंहिरण्यमग्निदैवतं
यथानामगोत्रायाऽमुकशर्म्मणे ब्राह्मणायदक्षिणांतुभ्यमहंसंप्रददे ॥ त

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तोब्रह्मग्रंथिविमोकः ॥ ओं सुमित्रियानऽआपओषधयःसन्तुइतिपवित्रंगृहीत्वा
प्रणीताजलेनशिरःसंमृज्य ॥ ओं दुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियंचवयंद्वि
ष्मः इत्यैशान्यांप्रणीतान्युब्जीकुर्यात् ॥ तत आस्तरणक्रमेणबर्हिरुत्थाप्यातेष्ट
नाभिघार्य्यहस्तेनैव होमः तत्रमंत्रः ॥ ओंदेवागातुविदोगातुंवित्वागातुमितमनस
स्यतइमंदेवयज्ञअँ स्वाहावातेधाः स्वाहा ॥ ततउत्थायवधूदक्षिणहस्तेनस्रुवस्पृ
ष्टघृतपुष्पफलैः पूर्णाहुतिंजुहुयात् ॥ तत्रमन्त्रः ॥ ओंमूर्द्धानन्दिवोअरतिंपृथि
व्यावैश्वानरमृतऽआजातमग्निम् ॥ कविंठ. सम्राजमतिथिंजनानामासन्नापात्रंज
नयन्तदेवाःस्वाहा ॥ ततः स्रुवेणभस्मानीयदक्षिणानामिकाग्रगृहीतभस्मना ॥
ओंत्र्यायुषंजमदग्नेरितिललाटे ॥ ओंकस्यपस्यत्र्यायुषंइतिग्रीवायां ॥ ओयद्देवे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

षुत्र्यायुषंइतिदक्षिणांसे ॥ ओं तन्नोअस्तुत्र्यायुषमितिहृदि ॥ एवंवध्वाअपिकु
र्यात ॥ तत्रतन्नोइत्यस्यस्थानेतत्तेइतिविशेषः ॥ ततआचारात्शण शंखशमीसु
वर्ण प्रेरितसिन्दूरकरणं वरकर्तृकंततोऽन्यैरपिप्रतिष्ठितस्त्रीपुरुषैः सिन्दूरकरणं
ग्राम्यवचनंवरः कुर्यात्ततत्रग्राम्याः स्त्रियः ॥ अथवेदितोमण्डपमागत्य दूर्वाक्ष
तादिग्रहणंततस्त्रिरात्र मक्षारलवणाशिनौअधः शायिनौनिवृतमैथुनौभवतः प्रा
ङ्मुखौवधूवरौस्थितौभवतः ॥ इतिविवाहकर्म्मपद्धतिः समाप्ता ॥ अथचतुर्थी
कर्म ॥ ततश्चतुर्थ्यामपररात्रेचतुर्थीकर्मतच्चगृहाभ्यं तरएवकार्य्यंततः उद्वर्तना
दिकृत्वा युगकाठोपरिउपविश्य स्नात्वाशुद्धवस्त्रंपरिधायगृहं प्रविश्यवधूवरौ
प्राङ्मुखौभवतः ॥ ओंगणपत्यादिदेवतापूजनं ॥ ततः कुशकंडिकारम्भः ॥ त

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्रक्रमः ॥ जामातृहस्तपरिमितांबेदिंकुशैः परिसमुह्यतान्कुशानै शान्यांपरित्य ज्यगोमयोदकेनो पलिप्यस्फेनस्रुवेणवा प्रागग्रप्रादेशमात्रं त्रिरुत्तरोत्तरक्रमेणो लिख्यउल्लेखनक्रमेणा नामिकांगुष्ठाभ्यां मृदमुद्धृत्यजलेनाभ्यु क्ष्यतत्रतूष्णींकां स्यपात्रेणाग्निमानीय स्वाभिमुखंनिदध्यात् ततः पुष्पचन्दनताम्बूल बस्त्राण्या दाय ओंअस्यांरात्रौकर्तव्यचतुर्थी होमकर्मणिकृताकृता बेक्षणरूपब्रह्मकर्मकर्तुम मुकगोत्र ममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनादिभिर्ब्रह्मत्वेनहोतृत्वेनचत्वाम हंवृणे इतिब्राह्मणंवृणुयात् होनारंचओंवृतोस्मीतिप्रतिबचनं ॥ यथाविहितंक र्मकुर्वितिबरेणोक्ते ओंकरबाणीतिब्राह्मणोबदेत् ॥ ततोग्नेर्दक्षिणतः शुद्धमासनं दत्वात दुपरिप्रागग्रान्कुशानास्ती र्यब्रह्माणमग्निप्रदक्षिणक्रमेणानीयओं अत्र

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्वंमेब्रह्माभवेत्यभिधाय ओं भवानीतिब्राह्मणेनोक्ते कल्पितासनेउदङ्मुखंब्रह्मा
णमुपवेशयेत् ॥ ततः पृथूदकपात्रमग्नेरुत्तरतः प्रतिष्ठाप्यप्रणीतापात्रंपुरतः कृ
त्वावारिणापरिपूर्यकुशै राच्छाद्यब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरिनि
दध्यात् ततः परिस्तरणंबर्हिषश्चतुर्थभागमादय आग्नेयादीशानांतं ब्रह्मणोग्नि
पर्यंतंनैर्ऋत्याद्वायव्यांतंअग्नितः प्रणीतापर्यंतंततोग्नेरुत्तरतः पश्चिमदिशिपवि
त्रछेदनार्थं कुशत्रयंपवित्रकरणार्थं साग्रमनंतर्गर्भकुशपत्रद्वयंप्रोक्षणी पात्रंआ
ज्यस्थाली संमार्जनार्थंकुत्रशयं उपयमनार्थंवेणीरूपकुशत्रयं समिधस्तिस्रः
स्रुवः आज्यंषट्पंचाशदुत्तरमुष्टिशतद्वया वच्छिन्नतंदुलपूर्णपात्रं एतानिपवित्रछे
दनकुशानांपूर्वपूर्वदिशिक्रमेणासादनीयानितत:पवित्रछेदनकुशैः पवित्रेछित्वाप्रा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

देशमितपवित्रकरणंततः सपवित्रकरेण प्रणीतोदकंत्रिः प्रोक्षणीपात्रेनिधायअना
मिकां गुष्ठाभ्यामुत्तराग्रेपबित्रे धृत्वात्रिरुत्पवनंततः प्रोक्षणीपात्रस्यसव्यहस्तक
रणंपबित्रेगृहीत्वा त्रिरुद्दिंगनंप्रणीतोदकेन प्रोक्षणीप्रोक्षणंततः प्रोक्षणीजलेनय
थासादितवस्तुसेचनं ततोग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रंनिधाय आज्यस्थाल्या
माज्यनिर्बापः ततोधिश्रयणंततोज्वल तृणादिनाहबिर्बेष्टयित्वाप्र दक्षिणक्रमेण
पर्यग्निकरणंततः स्रुवंप्रतप्यसंमार्जन कुशानामग्रैरंतरतोर्मूलैर्वाह्यतः स्रुवसंमा
र्जनंप्रणीतो दकेनाभ्युक्ष्यपुनः प्रतप्यस्रुवंदक्षिणतोनिदध्यात्ततः आज्यस्याग्नेर
वतारणंतत आज्येप्रोक्षणीवदुत्पवनं अबेक्ष्यसत्यपद्रव्ये तन्निरसनंपुनः पूर्ववत्
प्रोक्षण्युत्पवनं उपयमनकुशान्बाम हस्तेनादायउत्तिष्ठन् प्रजापतिंमनसाध्या

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्वातूष्णीमग्नौघृताक्ताः समिधसिस्रः क्षिपेत्ततउप बिश्यंप्रोक्षणीजलेनाग्निंप्र
दक्षिणं पर्युक्ष्यपवित्रंप्रणीतापात्रे धृत्वाब्रह्मणान्वारब्धः पातितदक्षिणजानुस्रुवे
णाज्याहुतिर्जुहुयात् तत्राघारादारभ्या हुतिचतुष्टयेतत्तदाहुत्यनन्तरं स्रुवावस्थिता
ज्यं प्रोक्षण्यांक्षिपेत् ॥ ओंप्रजापतयेस्वाहा इदंप्रजापतये ॥ इतिमनसा ॥ ओंइद्रा
यस्वहा इदमिंद्रायइत्याघारौ ॥ ओं अग्नयेस्वाहा इदमग्नये ॥ ओंसोमायस्वाहा ॥
इदंसायइत्याज्यभागौ ॥ ततआज्याहुति पंचतयेस्थालीपाकाहुतौचप्रत्याहुत्यनं
तरंस्रुवावस्थित हुतशेषघृतस्य प्रोक्षणीपात्रेप्रक्षेपः ततोब्राह्मणान्वारब्धंबिना ॥
ओंअग्नेप्रायश्चित्तेत्वं देवानांप्राय श्चित्तिरसि ब्राह्मण स्त्वानाथकाम उपधावा
मियास्यै पतिघ्नीतनूस्तामस्यै नाशयस्वाहा इदमनयै ॥ ओंवायोप्रायश्चितेत्वं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

देवानांप्राय श्चित्तिरसिब्राह्मण स्त्वानाथकाम उपधावामियास्यै प्रजाघ्नी तनु स्तामस्यैनाशयस्वाहाइदंवायवे ॥ ओंसूर्यप्रायश्चित्तेत्वंदेवानां प्रायश्चितिरसिब्राह्मणस्त्वानाथकाम उपधावामियास्यै पशुघ्नीतनूस्तामस्यै नाशयस्वाहा इदंसूर्याय ॥ ओंचन्द्रप्रायश्चित्तेत्वं देवानांप्रायश्चितिरसि ब्राह्मणस्त्वानाथकामउपधावामियास्यै गृहघ्नीस्तनूस्तामस्यै नाशयस्वाहा इदंचन्द्राय ॥ ओंगन्धर्वप्रायश्चित्तेत्वंदेवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वानाथकाम उपधावामियास्यै यशोघ्नीतनूस्तामस्यैनाशयस्वाहा इदंगन्धर्वाय ॥ ततःस्थालीपाकेनजुहुयात् ॥ ओंप्रजापतयेस्वाहा इदंप्रजापतये इतिमनसा ॥ अग्न्याहुतिनवकेहुतशेषघृतस्य प्रोक्षणीपात्रेप्रक्षेपः ॥ अयंचहोमो ब्रह्मणान्वारब्धकर्तृकः ॥ तत्रआज्यस्थालीपा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वि. ३१

काभ्यां स्विष्टकृद्धोमः ॥ ओंअग्नयेस्विष्टकृतेस्वाहा इदंमग्नयेस्विष्टकृते ॥ ततः आज्येन ओंभूःस्वाहाइदमग्नयेः ॥ ओंभुवः स्वाहाइदंबायवेः ॥ ओंस्वःस्वाहाइदंसूर्याय ॥ एतामहाव्याहृतयः ॥ ओंत्वन्नोअग्नेबरुणस्य बिद्वान्देवस्यहेडोअवयासिसीष्ठाः ॥ यजिष्ठोबन्हितमः शोशुचानोबिश्वाद्वेषाॐसिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीबरुणाभ्यां ॥ ओंसत्वन्नोअग्नेबमो भवोतीनेदिष्टोअस्याउषसोव्युष्टौ ॥ अबयक्ष्वनोवरुणर्ठं. रराणोबीहिमृडीकर्ठं. सुहवोनएधिस्वाहा इदमग्नीबरुणाभ्यां ॥ ओंअयाश्चाग्नेस्यनभिशास्ति पाश्चसत्यमित्वमयाआसि ॥ अयानोयज्ञंबहास्ययानोधेहिभेषजर्ठं. ॐस्वाहाइदमग्नये ॥ ओंयेतेशतंबरुणयेसहस्रंयज्ञियाःपाशाबिततामहांतस्ते भिन्नोंअद्यसबितोत बिष्णुर्बिश्वेमुंचन्तुमरुतः स्वर्काःस्वा

प. ३१

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हा इदंवरुणायसबित्रेबिष्णवे बिश्वेभ्योदेवेभ्यो मरुभ्यःस्वर्केभ्यः ॥ ओंउदुत्तम बरुणपाशमस्मदवाधमं बिमध्यमर्ठ.श्रथाय ॥ अथावयमादित्यब्रतेतबानाग सो अदितयेस्यमस्वाहा इदंबरुणाय ॥ एताः प्रायश्चितसंज्ञकाः ॥ ओं प्रजापतये स्वाहा इदंप्रजापतयेइतिमनसा ॥ इतिप्राजापत्यम् ॥ ततः संश्रवप्राशनं ॥ त तआचम्य ॥ ओंअस्यांरात्रौकृतैतच्च तुर्थीहोमकर्मणिकृताकृता बेक्षणरूपब्रह्म कर्मप्रतिष्ठार्थ मिदंपूर्णपात्रंप्रजापति दैवतममुकगोत्रायामुकशर्मणे ब्राह्मणायद क्षिणांतुभ्यमहं संप्रददेइतिदक्षिणांदद्यात् ॥ स्वस्तीतिप्रतिबचनं ॥ ततोब्रह्मग्रं थिबिमोकः ॥ ततःसुमित्रियान आपओषधयः संतुइतिपबित्राभ्यांशिरः संमृज्य ॥ ओं दुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियं चवयंद्विष्मइत्यैशान्यां दिशिप्रणीता

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

न्युञ्जीकुर्यात् ॥ ततस्तरणक्रमेण बर्हिरुत्थाप्यतेनाभिघार्थं हस्तेनैवजुहुयात् ॥
ओं देवागातुबिदोगातुं वित्वागातुमितमनसस्य तइमंदेवयज्ञ ॐस्वाहा वातेधाः
स्वाहा ॥ आम्रपल्लवेनजलमानीय मूर्ध्निवरोवधूमभिषिंचति ॥ ॐयातेपतिघ्नीप्रजा
घ्नीपशुघ्नी गृहघ्नीयशोघ्नीनिंदिता तनूर्जारघ्नीततएनाकरो मिसाजीर्यत्वंमयासह
श्रीअमुकदेविइतिमन्त्रेण ॥ ततोवधूंस्थालीपाकं प्राशयतिवरः ॥ ओंप्राणैस्ते
प्राणान्संदधामि ॥ ओंअस्थिभिस्तेऽस्थीनिसंदधामि ॥ ओंमांसैस्तेमांसानि
संदधामि ॥ ओंत्वचातेत्वचंसंदधामि ॥ इतिमन्त्रचतुष्टयेन प्रतिमन्त्रांतेऽन्नंप्रा
शयेत् ॥ ततोवधूहृदयंस्पृष्ट्वावरः पठेत् ॥ ओंयतेसुशीमेहृयं दिविचन्द्रमसि
श्रितंवेदाहं तन्मांतद्विद्यात्पश्येमशरदः शतंजीवेमशरदः शतंशृणुयामशर

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दःशतमिति ॥ अथकंकणमोक्षणादीनिग्रन्थि बिमोकादीनिआचार प्राप्तानिकर्म कृत्वाउत्थाय वधूदक्षिणहस्तस्पृष्टस्रुबेण धृतफलपुष्पपूर्णेन पूर्णाहुतिंकुर्यात् ॥ ओंमूर्धानंदिवोअरतिं पृथिव्याबैश्वानरमृत आजातमग्निं ॥ कबिठं. संम्राजमति थिंजनानामा सन्नापात्रंजनयन्तदेवाः स्वाहाइतिमन्त्रेणपूर्णाहुतिः ॥ ततः स्रुबे णभस्मानीयदक्षिणा नामिकाग्रगृहीतभस्मना ॥ ओंत्र्यायुषंजमदग्नेः ॥ इतिल लाटे ॥ ओंकश्यपस्यत्र्यायुष मितिग्रीवायां ॥ ओंयद्देबेषुतयायुषं इतिदक्षिणबा हुमूले ॥ तन्नोअस्तुत्र्यायुषंइतिहृदये ॥ एवंबध्वाअपित्र्यायुषंकुर्यात् ॥ तत्र तन्नो इत्यस्यस्थाने तत्तेइतिविशेषः ॥ तत आचार्यायदक्षिणांदद्यात् ॥ होत्रेचदक्षिणां दद्यात् ॥ भूयसींदतत्रद्यात् ॥ इतिचतुर्थीकर्मसमाप्तम् ॥ सं० १९५३

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्रीगणेशायनमः ॥ अथशाखोचार प्रारंभः ओंगणानान्त्वागणपतिठं हवाम
हेप्रियाणान्त्वाप्रियपतिठं.हवामहे निधीनान्त्वानिधिपतिठं. हवामहेवसोमम आ
हमजानिगर्भधमात्वमजासिगर्भधम् ॥ १ ॥ ओंबिश्वानिदेवसबित र्दुरितानिप
रासुवयद्भन्तन्नऽआसुव ॥ ओंद्यौः शान्तिरन्तरिक्षठं.शान्तिः पृथिबीशान्तिरा
पः शान्तिरोषधयः शान्तिः बनस्पतयः शान्तिर्बिश्वेदेवाः शान्तिर्ब्रह्मशान्तिःस
र्बठं.शान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ३ सुशान्तिर्भवतु ॥ अथशाखोच्चार
गौरीनन्दनगौरबर्णबदनः शृङ्गारलम्बोदरः सिन्दूरार्चितदिग्गजेन्द्रवदनः पा
णौरणनूपूरा । कर्णौलम्बबिलम्बगण्ड विलसत्कण्ठेचमुक्तावली श्रीबिघ्नेश्वरबि
घ्नभन्जनकरोदेया त्सदामङ्गलम् १ यावत्तोयधराधराधरधरा धाराधराभूधरायाव

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

चारुसुचारुचारुचमरं चामीकृतंचामरं यावद्रामणरामराम रमणंरामायणस्तुयते
ताबद्भोगबिभोगभोगभवनं भोगायनेनित्यसहः २ अस्यांरात्राबस्मिन्मङ्गलम
ण्डपाभ्यन्तरे स्वस्तिश्रीमद्विबिध विद्याविचार चातुरीबिनिर्जित सकलवादिवृ
न्दोपरिविराजमा पदपदार्थसाहित्यरचना मृतायमानकाव्य कौस्तुकचमत्कारप
रिणतनिसर्गसुन्दर सारस्वसतहजानुभाव गुणनिकरगुम्फीतयशः सुरभिकृतम
ङ्गलमण्डयस्य स्वस्तिश्रीमतः अमुकवेदान्तर्गतामुक शाखाध्येतुरमकसूत्रस्या
मुकगोत्र स्यामुकप्रबरस्यामुकशर्मणः प्रपौत्रोयं स्वस्तिश्रीमद्रमारमण पदार
बिन्दविभृङ्गायमान मुद्रितापवर्गमार्ग्यो पवेशशलकोदंडमहि मण्डलाखण्डरा
जहारटकोदान संतानसंतोषितयशः सदाचाराचारणपरि लब्धगरिष्ठप्रतिष्ठाव

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वि. ३४

शीकृतवशिष्ठादि मुनिगणयोगीयमान यशश्चन्द्रकरधवली कृतजगत्रितयस्य स्वस्तिश्रीमतः अमुकवेदान्तर्गतामुकशाखाध्ये तुरमुकसूत्रस्यामुक गोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्रोयं स्वस्तिमन्नवविविध बिद्याबिनोदवैषयकसम्पाद्यमानविरत्नगद्यपद्यावली विरचनचतुर चञ्चरीणप्रचुरतर वोद्धासौबुध्यधीरधुरीणान्तः करणविशदकुमुद कुसुमप्रकाशजित्वर जगद्दण्डखण्ड मण्डनविजय यशोधवली कृतशेषभुवनमण्डलस्य स्वस्तिश्रीमतः अमुकवेदान्त र्गतामुकशाखाध्येतुरमुकगोत्रस्या मुकप्रवरस्याऽमुकशर्म्मणः पुत्रोऽयं प्रयतपाणिः शरणं प्रपद्ये स्वस्तिसम्बादेष्वभ यम्बोबद्धिर्बरकन्ययो मङ्गलमास्तांवरजीरजीबीभव तान्कन्यासावित्री भूयादितिप्रथमशाखोच्चारः १ ओंयज्जाग्रतोदूरमुदैति दैवन्त

प. ३४

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ण्डवगाण्डीवाबिषयकृत समारकखण्डखण्ड मण्डलीकृत भूमण्डलाखण्डबरसिक
ब्रह्माण्डभाण्डमण्डपाधिपंप्रचण्ड चण्डमुण्डाध्विधकृत चण्डीहिण्डी रपिण्डध
वलचण्डीस्मरस्यस्वस्तिश्रीमतः अमुकबदान्तर्गतामुकशाखाध्येतुरमुकसूत्रस्या
ऽमुकप्रबरस्यामुकशर्मणः पुत्रोऽयंप्रयतपाणिशरणंप्रपद्ये स्वस्तिसम्बादेषूभयो र्वृ
द्धिर्बरकन्ययोर्मङ्गलमास्तांवरश्रीर्बीभवतात्कन्या साबित्रीभूयादिति द्वितीयशाखो
चारः ॥ ओंपुनन्तुमादेवजनाः पुनन्तुमनसाधियः पुनन्तुबिश्वाभूतानिजातबेदः
पुनीहिमा ।बैकुण्ठोगरुडध्वजोमधुरिपुः पीताम्बरः केशवोदैत्यारिः पुरषोत्तमस्सु
रःबरुरोबिश्वम्भरश्रीपतिःगोबिन्दोजनबल्लभोमुररिपुःश्रीदेवकीनन्दनःकंसारातिर
धोक्षजोगुणनिधिः कुर्यात्सदामङ्गलम् २अङ्गुल्याकःकपाटं प्रहरतिकुटिलोमाध

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वि. ३५

स्करसदाचारसंत चरितसकलस त्प्रतिष्ठश्रेष्ठविशिष्ठ वरिष्टस्य स्वस्तिश्रीमतः
अमुकगोत्रस्या मुकप्रवरस्यामुकशाखाध्येतुर मुकशर्मणः प्रपौत्रोऽयं स्वस्ति
श्रीमद्विबुधविशुद्ध बुध्यब्धिधराधिपेन्द्रा धिधेयमाधुर्याऽऽआनिध्वानो द्धतधर्म
धुरीणौकमाधवध्यानं लब्धलब्धातिसिद्धान्त धारणाधिकार त्वाधिकसाधुत्वाम्बु
धिधैर्यसिंध्वधर्माध्वं सनश्रद्धान्तः करणधारणविबुध विशदारविन्दाक्षागोबिन्दा
द्भुतपदारबिन्दाऽमल वृन्दातिबन्दिता नन्दामन्दकराखिल वृन्दाबनरमणभ्रमरा
तिभव्यभारत भूषणातिभूषितैकभू सुराधिराजस्य स्वस्तिश्रीमतः अमुकबेदा
न्तरगता मुकशाखाध्येतुर मुकसूत्रस्यामुकप्रबरस्या मुकशर्मणः पौत्रोऽयं स्व
स्तिश्रीमत्प्रचण्ड चण्डदोर्दण्डमण्डली रमणशरदरवांण्डखाण्ड वदाहसमतां

प. ३५

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दुसुप्तस्यतथैवैति ॥ दूरङ्गमज्ज्योतिषाज्ज्योति रेकन्तन्मेमनः शिवसकल्पमस्तु
१ ईशानोगिरिशोमृडः पशुपतिः शूलीशिवः शङ्करोभूतेशः प्रमथः धिपस्मरह
रोमृत्युञ्जयोधूर्जटिः श्रीकण्ठोवृषभध्वजोहरभवो गङ्गाधरः स्त्रम्बकः श्रीरुद्रःसु
रवृन्दवन्दितपदः कुर्यात्सदामङ्गलम् ॥ १ ॥ कृष्णस्यागमनं निशम्यसहसाद
ष्ट्वाफणीन्द्रंगुणं कौपीनंपरिधायचर्मकरिणः शम्भुः पुरोधावतिकृतिर्विस्वलि
ताह्यानतमुखोनग्नोहरः पातुवः ॥ अस्यांरात्रावस्मिन्मङ्गलमण्ड पाभ्यन्तरेस्व
स्तिश्रीमद्विविधविद्या लङ्कारसरदबिमल रोहिणीरमण रमणीयोदारसुन्दर दा
मोदरमकरन्दवृन्द शेषरप्रचण्डखण्ड मण्डलपूर्णपूरिन्दनन्दन चरणकमलभक्ति
तदुपरिमहानुभाव सकलविद्याविनीत निजकुलकमलकलिता प्रकाशनैकभा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वः किंबसन्तोनो चक्रीकिंकुलालो नहिधरणीधरः किद्विङ्गजिकः फणीन्द्रः नाहं घोराहिमर्द्दीकिमपिखगपतिनोहरिः किङ्कपीन्द्रः इत्थंराघावचोभिः प्रहसितवद नः पातुवश्चक्रपाणिः ॥ * ॥ * ॥ * ॥

श्री पं० महिमादत्त पाठकेनाति प्रयत्नेन संशोधिता विवाहपद्धति किञ्चिदशु द्धमस्तिभ्रान्त्याततविदुषां क्षन्तव्यम् ॥

मुंबई अक्षर में बनारस गोर्खायन्त्रालय में मुद्रित प्रकाशितम् ॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

Dr. Sanjay Arihar Librarian, Government District Library Varanasi. Digitized by eGangotri

॥ इति विवाहपद्धति समाप्ताः ॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri